## खरवसानयोर्विसर्जनीयः। (१८/७६)

[1]रः इति वर्तते। रेफान्तस्य पदस्य खरि परतोऽवसाने च[2] विसर्जनीयादेशो भवति। वृक्षश्छादयति। प्लक्षश्छादयति। [3]वृक्षस्तरति। प्लक्षस्तरति। अवसाने – वृक्षः। प्लक्षः। खरवसानयोः इति किम्? अग्निर्नयति। वायुर्नयति। इह [4]नृकुट्यां भवः नार्कुटः, नृपतेरपत्यं नार्पत्यः इति[5] वृद्धेर्बहिरङ्गलक्षणत्वात् तदाश्रयस्य रेफस्य [6]असिद्धं बहिरङ्गम् (व्या.प.४२) [7]इति असिद्धत्वाद् विसर्जनीयो न भवति॥

## रोः सुपि। (१६/३३९)

रु इत्यस्य रेफस्य सुपि परतो विसर्जनीयादेशो भवति। पयःसु[8]। सर्पिःषु[9]। यशःसु। सुपि इति सप्तमीबहुवचनं गृह्यते[10]। 'सिद्धे सत्यारम्भो नियमार्थः' (कात. प.६२), रोरेव सुपि [11]विसर्जनीयादेशः, नान्यस्य। गीर्षु। धूर्षु[12]॥

## भोभगोअघोअपूर्वस्य योऽशि। (१७/१६७)

भोर् भगोर् अघोर् इत्येवंपूर्वस्य अवर्णपूर्वस्य च रोः रेफस्य [13]यकारादेशो भवति अशि परतः। [14]भो अत्र। भगो अत्र। अघो अत्र। [15]भो ददाति। भगो ददाति। अघो ददाति। [16]अपूर्वस्य – क आस्ते, कयास्ते[17]। ब्राह्मणा ददति। पुरुषा ददति। भोभगोअघोअपूर्वस्य इति किम्? अग्निरत्र। वायुरत्र। [18]अश्ग्रहणं किम्? वृक्षः। प्लक्षः। [19]नैतदस्ति, संहितायाम् (८.२.१०८/३६२७) इत्यनुवर्तते। [20]तर्हि अश्ग्रहण-मुत्तरार्थम्। 'हलि सर्वेषाम्' (८.३.२२/१७१) इत्ययं लोपः अशि हलि यथा स्यात्, इह मा भूत्, वृक्षं वृश्चति इति वृक्षवृट्, तमाचष्टे [21]यः स वृक्षवयति, वृक्षवयतेरप्रत्ययः [22]वृक्षव् करोति। अथ तत्रैव अश्ग्रहणं कस्मान् न कृतम्? उत्तरार्थम्, 'मोऽनुस्वारः' (८. ३. २३/१२२) इति हल्मात्रे यथा स्यात्। 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८.३.१८/१६८), 'लोपः शाकल्यस्य' (८.३.१९/६७) इत्येतच्च वृक्षव् करोति इत्यत्र मा भूत् इत्यश्[23]ग्रहणम्। रोः इत्येव, प्रातरत्र। पुनरत्र॥

## व्योर्लघुप्रयत्नतरः शाकटायनस्य। (१८/१६८)

वकारयकारयोः भोभगोअघोअवर्णपूर्वयोः पदान्तयो लघुप्रयत्नतर[24] आदेशो भवति अशि परतः शाकटायनस्य आचार्यस्य मतेन। भोयत्र, भो अत्र। भगोयत्र, भगो अत्र। अघोयत्र, अघो अत्र। कयास्ते, क आस्ते। अस्मायुद्धर, अस्मा उद्धर। असावादित्यः, असा आदित्यः। द्वावत्र, द्वा अत्र। द्वावानय, द्वा आनय। लघुप्रयत्नतरत्वमुच्चारणे स्थानकरणशैथिल्यम्। स्थानं ताल्वादि। करणं जिह्वामूलादि। तयोरुच्चारणे शैथिल्यं मन्दप्रयत्नता[25]॥

---

1. वाक्यमिदं नास्ति ब.ड.इ.ह. 2. विषये इत्यधिकम् इ.ह. 3. वृक्षष्टकारः प्लक्षष्टकारः वृक्षश्चिनोति प्लक्षश्चिनोति वृक्षष्टीकते प्लक्षष्टीकते इत्यधिकम् ब. क. ड. इ. ह. 4. तु इत्यधिकम् ड. 5. अत्र इत्यधिकम् इ. 6. बहिरङ्गत्वेन इत्यधिकम् क. बहिरङ्गत्वं तेन ब. 7. अन्तरङ्गे इत्यधिकम् क. 8. वचःसु इत्यधिकम् ड. 9. हविःषु इत्यधिकम् ड. 10. न प्रत्याहारः इत्यधिकम् ब. ड. 11. विसर्जनीयो भवति क. 12. चतुर्षु इत्यधिकम् ब.क.इ.ह. 13. यकारः आदेशः क. 14. भोः अत्र क. 15. उदाहरणमिदं नास्ति ड. 16. अवर्णपूर्वस्य इ, अपूर्वकस्य ब. 17. काक आस्ते काकयास्ते इत्यधिकम् ड. इ. 18. अशिग्रहणं क, अशि इति ह. 19. संहिताधिकारादेवात्र भवितव्यम्, किम् अश्ग्रहणेन क.ह. 20. तर्हि नास्ति ब. 21. इति णिन् इत्यधिकम् ब.ड.इ. 22. वृक्षं करोति इति क. 23. ग्रहणं कृतम् क. 24. आन्तरतमः इत्यधिकम् क. 25. शाकटायनग्रहणं विभाषार्थम्। तेन यदापि लघुप्रयत्नतरो न भवत्यादेशस्तदापि तयोः पक्षे श्रवणं भवति इत्यधिकम् ड.